देव्या वाहनानि यथा,—
"विष्णुब्रह्मशिवैर्देवैर्ध्रियते सा जगन्मयी ।
शिवप्रेतो महादेवो ब्रह्मा लोहितपङ्कजः ।
हरिर्हरिस्तु विज्ञेयो वाहनानि महौजसः ॥
स्वमूर्त्या वाहनत्वन्तु तेषां यस्मान्न युज्यते ।
तस्मान्मूर्त्त्यन्तरं कृत्वा वाहनत्वं गतास्त्रयः ॥
यस्मिन् यस्मिन्महामाया प्रीणाति सततं
शिवा ।
तेन तेनैव रूपेण आसनान्यभवन् त्रयः ॥"
इति कालिकापुराणे ५७ अध्यायः ॥*॥
देवदानवानां वाहनानि यथा,—
पुलस्त्य उवाच ।
"शृणुष्व कथयिष्यामि सर्व्वेषामपि नारद ।
वाहनानि समासेन एकैकस्यानुपूर्व्वशः ॥
रुद्रहस्ततलोत्पन्नं महाकायं महागजम् ।
श्वेतवर्णं महावीर्य्यं देवराजस्य वाहनम् ॥
रौद्रोजःसम्भवं भीमं कृष्णवर्णं मनोजवम् ।
पौण्ड्रकं नाम महिषं धर्म्मराजस्य नारद ॥
रुद्रमानस-सम्भूतं श्यामं जलधिसंज्ञकम् ।
शिशुमारं दिव्यगतिं वाहनं वरुणस्य च ॥
रौद्रं शकटचक्राक्षं शैलाकारनरोत्तमम् ।
अम्बिकापादसम्भूतं वाहनं धनदस्य तु ॥
एकादशानां रुद्राणां वाहनानि महामुने ।
गन्धर्व्वाश्च महावीर्य्या भुजगेन्द्राः सुदारुणाः ॥
श्वेतानि सौरभेयाणि वृषाण्युग्रजवानि च ।
रथं चन्द्रमसश्चार्द्ध सहस्रहंसवाहनम् ॥
हयोढरथवाहाश्च आदित्या मुनिसत्तम ।
कुञ्जरस्थाश्च वसवो यक्षाश्च नरवाहनाः ॥
किन्नरा भुजगारूढ़ा हयारूढ़ौ तथाश्विनौ ।
सारङ्गाधिष्ठिता ब्रह्मन् मरुतो घोरदर्शनाः ॥
शुकारूढ़ाश्च कवयो गन्धर्व्वाश्च पदातिनः ।
आरुह्य वाहनान्येवं स्वानि स्वान्यमरोत्तमाः ॥
सन्नह्य निर्य्ययुर्हृष्टा युद्धाय सुमहौजसः ॥*॥
नारद उवाच ।
गदितानि सुरादीनां वाहनानि महामुने ।
दैत्यानां वाहनान्येवं यथावद्वक्तुमर्हसि ॥
पुलस्त्य उवाच ।
शृणुष्व दानवादीनां वाहनानि द्विजोत्तम ।
कथयिष्यामि तत्त्वेन यथावत् श्रोतुमर्हसि ॥
अन्धकस्य रथो युक्तः श्रेष्ठः परमवाजिभिः ।
कृष्णवर्णः सहस्रारस्त्रिनल्वपरिमाणवान् ॥
प्रह्लादस्य रथो दिव्यः श्वेतवर्णैर्हयोत्तमैः ।
उह्यमानस्तथाष्टाभिः शेतरुक्ममयः शुभः ॥
विरोचनस्य तु गजः कुम्भस्य तु तुरङ्गमः ।
जम्भस्य तु रथो दिव्यो हयैः काञ्चनसन्निभैः ॥
शङ्कुकर्णस्य तुरगो हयग्रीवस्य कुञ्जरः ।
रथो मयस्य विख्यातो दुन्दुभेश्च महोरगः ।
शम्बरस्य विमानोऽभूदयः शङ्कोर्न्नगाधिपः ॥"
इति श्रीवामनपुराणे ९ अध्यायः ॥
( वाहयतीति । वह + स्वार्थे णिच् + ल्युः । वाहके, त्रि । यथा, कथासरित्सागरे । १२४ । २२०—२२२ ।
"स वाहनानां नागानां शीकराम्बुमहाभरैः ।
शूकरप्रेयसीपृष्ठे स्वयं चक्रे कृषिं नृपः ॥"
"नागानां वाहना मेघाः शूकरप्रेयसी क्षितिः ।
विष्णोः शूकररूपस्य सा हि प्रियतमोच्यते ॥
तस्यां मेघाम्बुभिर्धान्यमुत्पन्नं चेत् किमद्भुतम् ॥")

वाहश्रेष्ठः, पुं, ( वाहेषु वाहनेषु श्रेष्ठः । ) अश्वः । इति राजनिर्घण्टः ॥

वाहसः, पुं, ( उह्यते इति । वह + "वहियुभ्यां णित् ।" उणा० ३ । ११९ । इति असच् । स च णित् । ) अजगरः । इत्यमरः ॥ ( यथा, तैत्तिरीयसंहितायाम् । ५ । ५ । १४ । १ ।
"त्वाष्ट्राः प्रतिश्रुत्कायै वाहसः ॥")
वारिनिर्य्यासम् । सुनिषण्णकम् । इति मेदिनी । से, २७ ॥

वाहा, स्त्री, ( वाह + अजादित्वात् टाप् । ) बाहुः । इत्यजयपालद्विरूपकोषौ ॥

वा(बा)हावा(बा)हवि, अ, (बाहुभिर्बाहुभिः प्रहृत्य इदं युद्धं प्रवृत्तं तत् । ) बाहुयुद्धम् । हाताहाति इति भाषा । इति मुग्धबोधव्याकरणम् ॥

वाहिकः, पुं, ( वाहेन परिमाणविशेषेण क्रीतः । वाह + "असमासे निष्कादिभ्यः ।" ५ । १ । २० । इति ठक् । ) ढक्का । गोवाहः । शकटादि । इति धरणिः ॥ त्रि, भारवाहकश्च ॥

वाहित्थं, क्ली, गजकुम्भस्याधोभागः । इत्यमरः ॥

वाहिनी, स्त्री, ( वाहा वाहनानि घोटकादीनि सन्त्यस्यामिति । वाह + इनिः । ङीप् ।) सेना । ( यथा, रघुः । ११ । ६ ।
"लक्ष्मणानुचरमेव राघवं
नेतुमैच्छदृषिरित्यसौ नृपः ।
आशिषं प्रयुयुजे न वाहिनीं
सा हि रक्षणविधौ तयोः क्षमा ॥" *॥
वाहः प्रवाहोऽस्त्यस्या इति । ) नदी । (यथा, रामायणे । २ । ८९ । ९ ।
"उत्तिष्ठत प्रबुध्यध्वं भद्रमस्तु हि वः सदा ।
नावः समुपकर्षध्वं तारयिष्याम वाहिनीम् ॥")
सेनाभेदः । तद्यथा । गजाः एकाशीतिः । रथाः एकाशीतिः । अश्वाश्चत्वारिंशदधिकशतद्वयम् । पदातिकाः पञ्चाधिकचतुःशतम् । समुदायेन दशाधिकाष्टशतं वाहाः सन्त्यस्याम् । इत्यमरभरतौ ॥ ( यथा, महाभारते । १ । २ । १९—२१ ।
"एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥
पत्तिन्तु त्रिगुणामेतामाहुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥
त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः ।
स्मृतास्तिस्रस्तु वाहिन्यः पृतनेति विचक्षणैः ॥"
प्रवाहशीला । यथा, मार्कण्डेये । ७८ । २९ ।
"यमुना च नदी यत्र कलिन्दान्तरवाहिनी ॥")

वाहिनीपतिः, पुं, ( वाहिन्याः सेनायाः पतिः । ) सेनापतिः । इत्यमरः ॥ ( यथा, महाभारते । ४ । २१ । ९ ।
"प्रवादेनेह मत्स्यानां राजा नाम्नायमुच्यते ।
अहमेव हि मत्स्यानां राजा वै वाहिनीपतिः ॥"
वाहिन्या नद्याः पतिः । ) समुद्रः । इति शब्दरत्नावली ॥

वाहीकः, पुं, देशभेदः । तत्पर्य्यायः । अट्टकः २ । इति हेमचन्द्रः ॥ जर्त्तिकजातिः । जाट् इति भाषा ॥ यथा,—
"तत्र वृद्धः पुरावृत्ताः कथाः कश्चिद्द्विजोत्तमः ।
वाहीकदेशं मद्रांश्च कुत्सयन् वाक्यमब्रवीत् ॥
पञ्चानां सिन्धुषष्ठानां नदीनां येऽन्तराश्रिताः ।
तान् धर्म्मवाह्यानशुचीन् वाहीकान् परि-
वर्ज्जयेत् ॥
शाकलं नाम नगरमापगानामनिम्नगा ।
जर्त्तिका नाम वाहीकास्तेषां वृत्तं सुनिन्दि-
तम् ॥"
इति महाभारते कर्णपर्व्वणि २०० अध्यायः ॥

वा(बा)हुः, पुं, ( बाधते शत्रूनिति । बाधृ लोड़ने + "अर्त्तिहशिकमीति ।" उणा० । १ । २८ । इति कुः हकारादेशश्च । ) कक्षावध्यङ्गुल्यग्रपर्य्यन्तावयवः । यथा । भुजबाहू प्रवेष्टो दोरित्यमरः ॥ वहत्यनेन वाहुः नाम्नीति उण् । घञि वाहोऽदन्तः । वाहोऽश्वभुजयोः पुमान् । इति दामोदरः । स्त्रियां वाहा च । वाहो वाहा भुजा वाहुर्दोषो दोषा च दोः पुमान् । इति कोषान्तरम् ॥ इति तट्टीकायां भरतः ॥ कूर्परस्योर्द्धभागो वाहुस्तस्याधोभागः प्रवाहुः । यथा,—
"मुखं वाहू प्रवाहू च मनः सर्व्वेन्द्रियाणि च ।
रक्षन्त्वव्याहतैश्वर्य्यस्तव नारायणोऽव्ययः ॥"
इति विष्णुपुराणे ५ अंशे ५ अध्यायः ॥
वाहुप्रवाहू च कूर्परस्योर्द्धाधोभागौ । इति तट्टीका ॥ अन्यत् पवर्गीयवकारादिबाहुशब्दे द्रष्टव्यम् ॥ * ॥ अस्य शुभाशुभलक्षणं यथा,—
"निर्मांसौ चैव भग्नाख्यौ श्लिष्टौ च विपुलौ भुजौ ।
आजानुलम्बिनौ वाहू वृत्तौ पीनौ नृपेश्वरे ॥
निःस्वानां रोमशौ ह्रस्वौ श्रेष्ठौ करिकरप्रभौ ।
हस्ताङ्गुलय एव स्युरायुर्दा ललिताः शुभाः ॥
मेधाविनाश्च सूक्ष्माः स्युर्भृत्यानां चिपिटाः
स्मृताः ।
स्थूलाङ्गुलीभिर्निःस्वाः स्युर्नताः स्युर्वहिरन्नदाः ॥
कपितुल्यकरा निःस्वा व्याघ्रतुल्यकरैर्धनम् ।
मणिबन्धैर्निगूढ़ैश्च सुश्लिष्टशुभसन्धिभिः ॥
नृपा हीनैः करच्छेदः सशब्दैर्धनवर्ज्जिताः ।
पितृवित्तविहीनाश्च निम्नात् करतलान्नराः ॥
संवृत्तेश्चैव निम्नैश्च धनिनः परिकीर्त्तिताः ।
प्रोक्ता नरकदातारो विषमैर्विषमा नराः ॥
करैः करतलैश्चैव लाक्षाभैरीश्वरास्तलैः ।
परदाररताः पीतै रूक्षैर्निःस्वा नरा मताः ॥
तुषतुल्यनखाः क्लीवाः कुटिलैः स्फुटितैर्नराः ।
निःस्वाश्चक्रनखैस्तद्वद्विवर्णैः परतर्ककाः ॥
ताम्रैर्भूपा धनाढ्याश्च अङ्गुष्ठैः सयवैस्तथा ।
अङ्गुष्ठमूलजैः प्रेष्यः स्याद्दीर्घाङ्गुलिपर्व्वकः ॥